कुर्वन्ति” (६,५,२,१२) श०ब्रा०। “तया च स्वयमिष्टका-ग्रहणाद्येकैका निधानान्ता क्रियते” क०। ‘इष्टकास्तु तिस्रो विश्वज्योतिषः पृथगलक्षणास्त्र्यालिखिताः” ६सू०। “तुशब्दश्चार्थे चशब्दाद्यजमान एव तिस्र इष्टकाः विश्वज्योतिःसंज्ञकाः पृथगलक्षणाः करोति लक्षणकरणं च प्रथमाद्वितीयाप्रस्तारत्यर्थमेवोपधानं यथा स्यादिति” क०। “मृदमुपशयां निदधाति” ७सू०। ‘उखां क्रियमाणामुपशेतइत्युपशया तां मृदमतिरिच्यमानां निदधाति कार्यार्थम्” क०। “अवशिष्टां मृदमुपशयसंज्ञां” निदधाति” संप्र०। “सप्तभिरश्वशकृद्भिरुखां धूपयति दक्षिणाग्न्यादीप्तैरेकैकेन वसवस्त्वेति (११, ६०) प्रतिमन्त्रम् ८सू०। “शकृद्भिरश्वलेण्डैः” संप्र०। “अभ्र्या श्वभ्रं चतुरस्रं खनत्यदितिष्ट्वेति (११, ६१) ९सू०। “अभ्रिश्च पूर्वोक्तैव प्रकृतत्वात् अत्र सा वैणव्यभ्रिरुत्सीदतीति (६,५,४,२) श०ब्रा०वचनात्” क०। “अपणमास्तीर्य यथाकृतमवदधाति” १०सू०। श्वभ्रे, येनैव क्रमेण कृता अषाढाद्याः उखायां तु विशेषः, “देवानां त्वेत्युखां (११,६१) न्युब्जाम्” ११सू०। “अवदधाति” क०। “अपणेनाच्छाद्य दक्षिणाग्निनादीपयति धिषणास्त्वेति (११,६१) १२सू०। “निर्मन्थ्येन वा धूपनश्रपणे” १३सू०। “कर्त्तव्ये” क०। “वरूत्रीष्ट्वेतीक्षमाणो (११,६१) जपति” १४सू०। “उखाभीक्षमाणः” क०। “आचरति मित्रस्येति (११, ६२) १५सू०। “आचरणं च श्रपणप्रक्षेपः” क०। अषाढादीनामधस्तादुपरिष्टाच्च पुनः श्रपणं प्रक्षिपति” संप्र० “यावद्वाचरेत्” १६सू०। “यावद्भिः प्रकारैः श्रपणं प्रक्षिपेत्तावद्वानेनैव मन्त्रेणाचरेत्” संप्र०। “दिवैव प्रदहनोद्धरणे” १७सू०। “कर्त्तव्ये” (६,५,४,१०) श०ब्रा०। “प्रदहनं पचनम् उद्धरणं बहिर्निष्क्राशनम्” संप्र०। “उद्वपति श्रपणम्” १८सू०। “पदार्थतया” क०। “भस्मसाद्भूतं पराकरोति” संप्र०। देवस्त्वेत्युखाम्” १९सू० (११,२३)। “उद्वपति” क०। “उत्तानां करोत्यव्यथमानेति (११,६३) २०सू०। “उद्यच्छत्युखाम्” (११,६४) २१स०। “ऊर्ध्वं यच्छति” क०। “परिदद्य पात्रे करोति मित्रैतां तइति” (११, ६४, २२सू०। “अजापयसावसिञ्चति वसवस्त्वेति” (११,६५) प्रतिमन्त्रम्” २३सू०। “उखाम्। त्रिचपक्षे च उत्तानकरणाद्येकैका अजापयसावसेकान्ता कर्त्तव्या” क०। “इष्टकाक्रियालक्ष्म्यालिखितानाम्” २४ सू०। “अत ऊर्ध्वमिष्टकास्त्र्यालिखिताः क्रियन्ते” क०। “अपरिमितालिखिता वोत्तरयोः” २५ सू०। “द्वितीयाचतुर्थ्योः कुत एतत् ते हि प्रकृत्याम्नायते “रसो हैते चिती अपरिमित उ वै रस इति’ (८,७,२,१७), श०ब्रा०। ‘अतश्च विकल्पोऽयम्”क०। “पूर्ववदग्निः पाके” २६ सू०। “इष्टकानां पाके भवति निर्मन्थ्यो दक्षिणाग्निर्वा” क० फाल्गुनामावास्यायां दीक्षामुक्त्वा कृत्यशेषं तत्राह। “दण्डोच्छ्रयणान्तं कृत्वाध्वर्युयजमानयोरन्यतर उखामाहवनीयेऽधिश्रयति मुञ्जकुलायशणकुलायावस्तीर्णाम् अन्तरेभ्यणां मा सु भित्था इति (११, ६८) तिष्ठन्नुदङ्प्राङ्” ३१सू०। दण्डोच्छ्रयणान्तमाध्वरिकं कर्म कृत्वा उखामाहवनीयेऽधिश्रयति, सा च मुञ्जकुलायावस्तीर्णा भवति अन्तरेभ्यणा। प्रागुदीचीं दिशमभिमुखः। अधिकारमुपजीवन्नाह” क० “रुक्मप्रतिमोचनविष्णुक्रमवात्सप्रेषु च” ३२सू० प्रागुदीचीं दिशमभिमुखो भवति”क० “अग्नावारूढे त्रयोदशास्यां प्रादेशमात्रीः समिध आदधाति” ३३सू०। “उखायामग्नावारूढे त्रयोदश समिध आदधाति, प्रादेशमात्रीग्रहणं च शिष्टानुस्मरणप्रत्तप्रार्थम्” क०। “अनारोहत्यङ्गारानोप्यैके” ३४सू०। अनारोहत्यग्नावुखायाम् अङ्गारानोप्यैके समिदाधानं कुर्वन्ति” क०। ता इदानीमाह, “इतोन्नां कार्मुकीं द्रव इति” (११,७०) ३५सू०। “आदधाति, क्रमुको धमनः तदीया कार्मुकी” क०। “वैकङ्कतीं परस्या इति(११,७१) ३६सू०। “औदुम्बरीं परमस्या इति” (११,७२) ३७सू०। “अपरशुवृक्णां यदग्नइति”(११,७३) ३८सू०। “या परशुना न छिन्ना” क०। “अकुठारच्छिन्नाम्” संप्र०। “अधःशयां यदत्तीति” (११,७४) ३९सू०। “भूमिसंलग्ना या सदा रूढा भवति” संप्र०। “पालाशीः प्रत्यृचमहरहरिति” (११,७५)। ४०सू०। ‘आदधाति अथैताःपालाश्यो भवन्तीति (६,६,२,७)श०ब्रा वचनात्, एवं चापरशुवृक्णा अधःशया चौदुम्बर्यावेव भवतः जात्यन्तराविधानात्” क०। “उपोत्तमां क्षत्रियस्येच्छन्” ४१सू०। “उत्तमायाः समीपे उपोत्तमा द्वादशी, तां क्षत्रियस्य यजमानस्येच्छयादधाति अन्यस्य क्षत्रियपुरोहितव्यतिरिक्तस्य उभे उपोत्तमोत्तमे इच्छयाधीयेते, एवं हि श्रूयते” श०ब्रा० (६,६,३,१२) क०। “एवं च सति, उत्तमां पुरोहितस्य” ४२सू०। “इच्छयादधाति” क०। “उत्तमाम् बाहूइति’ (११,८२) संप्र०। “अन्यस्योभे” ४३सू०। “अन्यक्षत्रियस्यापुरोहितस्य च